# अथ लघुशिवस्तुतिः

ललितचंद्रनिभाननसुस्मितं शिवपदं शिवदं स्मरतां शिवम् ।
विशदकोटितटित्प्रभया युतं शिवजया शिवया शिवया युतम् ॥१॥

नटननाट्यनटं नटगायकं जनमुदं जलजायतलोचनम् ।
भुजगभूषणभूषितविग्रहं प्रणम हे जनते जनवल्लभम् ॥२॥

श्रुतिशतप्रभया प्रभया युतं हरिपदाब्जभवां शिरसा धृतम् ।
शिव शिवेति शिवेति शिवेति वै शिव भवेति भवेति भवेति वा ।
मृड मृडेति मृडेति मृडेति वै भजति यः सततं प्रणतामियात्॥३॥

## इति श्रीव्यासतीर्थयतिकृता लघुशिवस्तुतिः ॥